# shrILaxmI-Nrisinha PancharatnaStotra

# શ્રીલક્ષ્મીનૃસિંહપઞ્ચરત્નમ્

## Document Information

Text title : lakshmiinRisi.nhapancharatnam

File name : laxm-nri.itx

Category : pancharatna, vishhnu, dashAvatAra, shankarAchArya, vishnu

Location : doc_vishhnu

Author : Shankaracharya

Latest update : December 1, 1999

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

# શ્રીલક્ષ્મીનૃસિંહપઞ્ચરત્નમ્

ત્વત્પ્રભુજીવપ્રિયમિચ્છસિ ચેન્નરહરિપૂજાં કુરુ સતતં
 પ્રતિબિમ્બાલંકૃતિધૃતિકુશલો બિમ્બાલંકૃતિમાતનુતે ।
ચેતોભૃઙ્ગ ભ્રમસિ વૃથા ભવમરુભૂમૌ વિરસાયાં
 ભજ ભજ લક્ષ્મીનરસિંહાનઘપદસરસિજમકરન્દમ્ ॥ ૧॥

શુક્ત્તૌ રજતપ્રતિભા જાતા કતકાદ્યર્થસમર્થા ચે-
 દ્દુઃખમયી તે સંસૃતિરેષા નિર્વૃતિદાને નિપુણા સ્યાત્ ।
ચેતોભૃઙ્ગ ભ્રમસિ વૃથા ભવમરુભૂમૌ વિરસાયાં
 ભજ ભજ લક્ષ્મીનરસિંહાનઘપદસરસિજમકરન્દમ્ ॥ ૨॥

આકૃતિસામ્યાચ્છાલ્મલિકુસુમે સ્થલનલિનત્વભ્રમમકરોઃ
 ગન્ધરસાવિહ કિમુ વિદ્યેતે વિફલં ભ્રામ્યસિ ભૃશવિરસેસ્મિન્ ।
ચેતોભૃઙ્ગ ભ્રમસિ વૃથા ભવમરુભૂમૌ વિરસાયાં
 ભજ ભજ લક્ષ્મીનરસિંહાનઘપદસરસિજમકરન્દમ્ ॥ ૩॥

સ્રક્ચન્દનવનિતાદીન્વિષયાન્સુખદાન્મત્વા તત્ર વિહરસે
 ગન્ધફલીસદૃશા નનુ તેમી ભોગાનન્તરદુઃખકૃતઃ સ્યુઃ ।
ચેતોભૃઙ્ગ ભ્રમસિ વૃથા ભવમરુભૂમૌ વિરસાયાં
 ભજ ભજ લક્ષ્મીનરસિંહાનઘપદસરસિજમકરન્દમ્ ॥ ૪॥

તવ હિતમેકં વચનં વક્ષ્યે શ ૃણુ સુખકામો યદિ સતતં
 સ્વપ્ને દૃષ્ટં સકલં હિ મૃષા જાગ્રતિ ચ સ્મર તદ્વદિતિ।
ચેતોભૃઙ્ગ ભ્રમસિ વૃથા ભવમરુભૂમૌ વિરસાયાં
 ભજ ભજ લક્ષ્મીનરસિંહાનઘપદસરસિજમકરન્દમ્ ॥ ૫॥

ઇતિ શ્રીમત્પરમહંસપરિવ્રાજકાચાર્યસ્ય
શ્રી ગોવિન્દ ભગવત્પૂજ્યપાદ શિષ્યસ્ય
શ્રીમચ્છંકર ભગવતઃ કૃતૌ
લક્ષ્મીનૃસિંહ પઞ્ચરત્નં સમ્પૂર્ણમ્ ॥

*shrILaxmI-Nrisinha PancharatnaStotra*

pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*